दिनाङ्क 3-12-20 शास्त्री प्रथम खण्ड, विषय व्याकरण (1)
ग्रन्थ – प्रौढमनोरमा

प्रश्न: नाज्झलौ 'अत्याच्छन्दं एव' मनोरमोक्त विशदव्याख्या कार्या:।
उत्तर– अनुत्पन्न, आकारेण [illegible] दीर्घप्लुतयोरपि [illegible] इति [illegible] पुंस्त्वं अविवक्षितं इति समाहार: द्वन्द्व: [illegible] अन्तर्भूताच्कारस्य सावर्ण्यं न स्यादिति आदाय [illegible] समाहारस्य प्रकृष्टार्थत्वम् । अत एव काले [illegible] इत्यादि निर्देश: प्रश्लेष [illegible] इत्यादौ [illegible] इत्यादि गुरोरनृत: इति प्लुतादीनामात्वरूपस्य सत: सवर्णत्वं स्यादेवेति व्याख्यम् । आद्यम् आकारस्येति सवर्णदीर्घेण दीर्घान्तरेण प्लुतेऽपि प्रश्लिष्यत, इति व्याख्यानात् । वर्णादिकमिति । शीतल शब्दे सवर्णदीर्घ आदि शब्दार्थ:।

ननु नाज्झलौ इत्यत्र इति दीर्घस्य सत्त्वेन प्लुतस्य सद्भावे किं मानम् । आश्रयते प्रथम भेदे नाज्झलो: सावर्ण्याभावसाधनम् एतत्काम्यते कथं सावर्ण्यस्याभाव: । ननु तुल्यास्य इत्यत्र नाज्झलौ इति निषेधेन अज्झलोर्मिलितेन संयोगे च नाज्झलौर्न न सावर्ण्य प्रसक्तिरिति व्याख्यम् एवं तर्हि एवं अचां हलामपि परस्परं सवर्ण संज्ञा न स्यादिति चेन्न । स्वविशिष्ट: सवर्णसंज्ञो भवति । वैशिष्ट्यं च स्वत्वाभाव ~~[illegible]~~ हलत्वाभावाभाववत्त्वं स्वनिष्ठजन्यतानिरूपित स्वत्वजन्य जनकता विशिष्ट जनकता निरूपित जन्यतावत्त्वम् । एतदुभयसम्बन्धेन जनकता वैशिष्ट्यम् च स्वत्वाभावत्वं ~~[illegible]~~ स्वनिरूपित व्यापकत्व मेतदुभय सम्बन्धेन नेत्यार्थ मत्वने नादोष:। यथा [illegible] शास्त्रस्य [illegible] निर्णयन्ते:।

अयं भाव: आदिरन्त्येन इति प्रत्याहारसिद्धौ नाज्झलौ इत्यत्र तद्वाच्यार्थबोधो नाज्झलौ इत्येतद्वाच्यार्थबोधे सति नीर्णीते– तद्विषयपरिहारेण सवर्णपदवाच्यत्व निश्चये अनुदित इत्यनेन तत्त्वतो ग्रहणं बोधनीयम् । अथवा सावक संभावनया तुल्यास्य सूत्रम् शास्त्रीय आप्रमाणं सन्देहेन तत्कालसत्यं बोधनाय इति।

अमरनाथ मिश्र
एसो॰ प्रो॰ व्याकरण.
श्री॰ उ॰ सं॰ म॰ विद्यालय
[illegible]

दिनांकः
3-12-20

उपशास्त्री द्वितीयवर्ष, विषय-व्याकरण
ग्रन्थ-सिद्धान्तकौमुदी, तुदादिगणः

1- कर्तिष्यति — कृती धातोः ~~लृट्~~ लृट्, लृट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये, अनुबन्धलोपे। सार्वधातुकसंज्ञायां शप्प्रबाध्य तुदादिभ्यः शः इति सूत्रेण श प्रत्यये प्राप्ते तं प्रबाध्य स्यतासी लृलुटोः इति सूत्रेण स्य प्रत्यये। सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इति गुणे रपरे कर्तिस्यति इति दशायां सेऽसिचि [illegible] सूत्रेण वा इडागमे। आदेशप्रत्यययोः इति षत्वे कर्तिष्यति इति सिद्धम्। इडभावे कर्त्स्यति इति रूपं भवति।

2 ववृश्च — व्रश्च धातोः लिट्, लिट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे। परस्मैपदानां णल... इति सूत्रेण तिप्स्थाने णलादेशे अनुबन्धलोपे। लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे अभ्याससंज्ञायाम्। उरत् इति अत्वे रपरत्वे हलादिशेषे ववृश्च इति सिद्धम्।

3- आनर्छ — ऋच्छ धातोः लिट्, लिट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये, परस्मैपदानां णल... इति सूत्रेण तिप्स्थाने णलादेशे अनुबन्धलोपे। लिटि धातोरनभ्यासस्य इति द्वित्वे अभ्याससंज्ञायां उरत् इति अत्वे रपरत्वे, हलादिः शेषे। णित्वात् अत आदेः, तस्मान्नुड् द्विहलः इति नुडागमे, ऋच्छत्यॄताम् इति गुणे रपरे कृते आनर्छ इति सिद्धम्।

4- निःष्फुरति — निस् पूर्वक स्फुर धातोः लट् लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये. अनुबन्धलोपे। सार्वधातुकसंज्ञायां शप्प्रबाध्य तुदादिभ्यः शः इति सूत्रेण श प्रत्यये अनुबन्धलोपे। निस् सकारस्य स्थाने रुत्वे, ~~खरव साने~~ खरवसानयोर्विसर्जनीयः इति विसर्गे। स्फुरति स्फुलत्योर्निर्निविभ्यः इति षत्वे निःष्फुरति इति दशायां ~~शर्परे~~ शर्परे खरि वा विसर्गलोपो वक्तव्यः इति वार्तिकेन वा विसर्गलोपे निष्फुरति इति विसर्गपक्षे वा शरि इति वार्तिकेन वा विसर्ग~~लोपे~~स्य विसर्गो निःष्फुरति इति, तदभावपक्षे विसर्जनीयस्य सः इति सकारे तस्य ष्टुत्वेन षकारे निष्ष्फुरति इति रूपं सिद्धम्।

अमरनाथ मिश्र
ए.सो. प्रो. व्याकरण
रा.उ.सं.म.वि.
[illegible]